
एकादशः पाठः

# व्याघ्रपथिककथा



(अयं पाठः नारायणपण्डितरचितस्य हितोपदेशनामकस्य नीतिकथाग्रन्थस्य मित्रलाभनामकखण्डात् सङ्कलितः। हितोपदेशे बालकानां मनोरञ्जनाय नीतिशिक्षणाय च नानाकथाः पशुपक्षिसम्बद्धाःश्राविताः। प्रस्तुतकथायां लोभस्य दुष्परिणामः प्रकटितः। पशुपक्षिकथानां मूल्यं मानवानां शिक्षार्थं प्रभूतं भवति इति एतादृशीभिः कथाभिः ज्ञायते।)

कश्चित् वृद्धव्याघ्रः स्नातः कुशहस्तः सरस्तीरे ब्रूते- 'भो भोः पान्थाः। इदं सुवर्णकङ्कणं गृह्यताम्।' ततो लोभाकृष्टेन केनचित्पान्थेनालोचितम्- भाग्येनैतत्संभवति। किंत्वस्मिन्नात्मसंदेहे प्रवृत्तिर्न विधेया। यतः –

अनिष्टादिष्टलाभेऽपि न गतिर्जायते शुभा।
यत्रास्ते विषसंसर्गोऽमृतं तदपि मृत्यवे॥

'किंतु सर्वत्रार्थार्जने प्रवृत्तिः संदेह एव। तन्निरूपयामि तावत्।' प्रकाशं ब्रूते – 'कुत्र तव कङ्कणम् ?' व्याघ्रो हस्तं प्रसार्य दर्शयति। पान्थोऽवदत्- 'कथं मारात्मके त्वयि विश्वासः ? व्याघ्र उवाच – 'शृणु रे पान्थ ! प्रागेव यौवनदशायामतिदुर्वृत्त आसम्। अनेकगोमानुषाणां वधान्मे पुत्रा मृता दाराश्च। वंशहीनश्चाहम्। ततः केनचिद्धार्मिकेणाहमादिष्टः – 'दानधर्मादिकं चरतु भवान्।' तदुपदेशादिदानीमहं स्नानशीलो दाता वृद्धो गलितनखदन्तो कथं न विश्वासभूमिः ? मया च धर्मशास्त्राण्यधीतानि। शृणु –

**दरिद्रान्भर कौन्तेय ! मा प्रयच्छेश्वरे धनम्।**
**व्याधितस्यौषधं पथ्यं, नीरुजस्य किमौषधैः ॥**

अन्यच्च –

**दातव्यमिति यद्दानं दीयतेऽनुपकारिणे।**
**देशे काले च पात्रे च तद्दानं सात्त्विकं विदुः॥**

तदत्र सरसि स्नात्वा सुवर्णकङ्कणं गृहाण।' ततो यावदसौ तद्वचः प्रतीतो लोभात्सरः स्नातुं प्रविशति तावन्महापङ्के निमग्नः पलायितुमक्षमः। पङ्के पतितं दृष्ट्वा व्याघ्रोऽवदत् – 'अहह, महापङ्के पतितोऽसि। अतस्त्वामहमुत्थापयामि।' इत्युक्त्वा शनैः शनैरुपगम्य तेन व्याघ्रेण धृतः स पान्थोऽचिन्तयत् –

**अवशेन्द्रियचित्तानां हस्तिस्नानमिव क्रिया।**
**दुर्भगाभरणप्रायो ज्ञानं भारः क्रियां विना॥**

इति चिन्तयन्नेवासौ व्याघ्रेण व्यापादितः खादितश्च। अत उच्यते –

**कङ्कणस्य तु लोभेन मग्नः पङ्के सुदुस्तरे।**
**वृद्धव्याघ्रेण संप्राप्तः पथिकः स मृतो यथा॥**

ABDIEL SOLUTIONS ABSOL PATNA

## शब्दार्थाः

| | | |
|---|---|---|
| स्नातः | अवगाढ़ः | नहाया हुआ |
| सरः | सरोवरः | तालाब |
| तीरम् | पुलिनम् | तट |
| पान्थाः | पथिकाः | पथिक |
| सुवर्णकङ्कणम् | स्वर्णरचितं कङ्कणम् | सोने का कंगन |

| | | |
|---|---|---|
| लोभाकृष्टेन - | लोभाभिभूतेन - | लालच से आकर्षित के द्वारा |
| आलोचितम् - | विचारितम् - | विचार किया |
| प्रवृत्तिः - | कार्यम् - | कार्य |
| विधेया - | कर्त्तव्या - | करना चाहिए |
| निरूपयामि - | निश्चयं करोमि - | निश्चय करता हूँ |
| प्रसार्य - | विस्तार्य - | फैलाकर |
| मारात्मके - | हिंसके - | हिंसक पर |
| उवाच - | अवदत् - | कहा |
| दुर्वृत्तः - | दुराचारी - | बुरे आचरण वाला |
| दाराः - | पत्नी - | पत्नी |
| ईश्वरे - | धनिके - | धनी में |
| नीरुजस्य - | रोगरहितस्य - | निरोग का |
| अनुपकारिणे - | उपकाररहिताय - | उपकार न करने वाले के लिए |
| स्नात्वा - | स्नानं कृत्वा - | नहाकर |
| पलायितुम् - | अपसर्तुम् - | भागने के लिए |
| अक्षमः - | असमर्थः - | अशक्त |
| उक्त्वा - | कथयित्वा - | कहकर |
| उपगम्य - | समीपं गत्वा - | निकट जाकर |

ABDIEL SOLUTIONS
ABSOL
★ PATNA ★

## व्याकरणम्

**सन्धिविच्छेदः -**

कश्चित् - कः + चित्

सरस्तीरे - सरः + तीरे

पान्थेनालोचितम् - पान्थेन + आलोचितम्

| | | |
|---|---|---|
| भाग्येनैतत्संभवति | – | भाग्येन + एतत् + संभवति |
| किंत्वस्मिन्नात्मसंदेहे | – | किम् + तु + अस्मिन् + आत्मसंदेहे |
| प्रवृत्तिर्न | – | प्रवृत्तिः + न |
| अनिष्टादिष्टलाभेऽपि | – | अनिष्टात् + इष्टलाभे + अपि |
| गतिर्जायते | – | गतिः + जायते |
| विषसंसर्गोऽमृतम् | – | विषसंसर्गः + अमृतम् |
| तदपि | – | तत् + अपि |
| सर्वत्रार्थार्जने | – | सर्वत्र + अर्थ + अर्जने |
| तन्निरूपयामि | – | तत् + निरूपयामि |
| पान्थोऽवदत् | – | पान्थः + अवदत् |
| प्रागेव | – | प्राक् + एव |
| वधान्मे | – | वधात् + मे |
| दाराश्च | – | दाराः + च |
| वंशहीनश्चाहम् | – | वंशहीनः + च + अहम् |
| केनचिद्धार्मिकेणाहमादिष्टः | – | केनचित् + धार्मिकेण + अहम् + आदिष्टः |
| तदुपदेशादिदानीमहम् | – | तत् + उपदेशात् + इदानीम् + अहम् |
| धर्मशास्त्राण्यधीतानि | – | धर्मशास्त्राणि + अधीतानि |
| प्रयच्छेश्वरे | – | प्रयच्छ + ईश्वरे |
| व्याधितस्यौषधम् | – | व्याधितस्य + औषधम् |
| अन्यच्च | – | अन्यत् + च |
| दातव्यमिति | – | दातव्यम् + इति |
| यद्दानम् | – | यत् + दानम् |

ABDIEL SOLUTIONS ABSOL ★PATNA★

दीयतेऽनुपकारिणे – दीयते + अनुपकारिणे

तद्दानम् – तत् + दानम्

तदत्र – तत् + अत्र

यावदसौ – यावत् + असौ

तावन्महापङ्के – तावत् + महापङ्के

व्याघ्रोऽवदत् – व्याघ्रः + अवदत्

पतितोऽसि – पतितः + असि

अतस्त्वाम् – अतः + त्वाम्

इत्युक्त्वा – इति + उक्त्वा

शनैरुपगम्य – शनैः + उपागम्य

पान्थोऽचिन्तयत् – पान्थः + अचिन्तयत्

अवशेन्द्रियचित्तानाम् – अवश + इन्द्रियचित्तानाम्

चिन्तयन्नेवासौ – चिन्तयन् + एव + असौ

खादितश्च – खादितः + च

**प्रकृतिप्रत्ययविभागः**

स्नातः = $\sqrt{\text{स्ना}}$ + क्त

प्रसार्य = प्र + $\sqrt{\text{सृ}}$ + णिच् + ल्यप्

दातव्यम् = $\sqrt{\text{दा}}$ + तव्यत्

स्नात्वा = $\sqrt{\text{स्ना}}$ + क्त्वा

पलायितुम् = परा + $\sqrt{\text{अय्}}$ + तुमुन्

उक्त्वा = $\sqrt{\text{वच्}}$ +क्त्वा

| | | |
|---|---|---|
| चिन्तयन् | = | $\sqrt{\text{चिन्त्}}$ + शतृ |
| मृतः | = | मृ + क्त |
| संप्राप्त | = | सम् + प्र + $\sqrt{\text{आप्}}$ + क्त |
| उपगम्य | = | उप + $\sqrt{\text{गम्}}$ + ल्यप् |
| धृतः | = | $\sqrt{\text{धृ}}$ +क्त |

**समासः**

| | | |
|---|---|---|
| सुवर्णकङ्कणम् | – | सुवर्णस्य कङ्कणम् (षष्ठी तत्पुरुषः) |
| गलितनखदन्तः | – | गलिताः नखादन्ताःयस्य स, (बहुव्रीहिः) |
| हस्तिस्नानम् | – | हस्तिनः स्नानम्, (षष्ठी तत्पुरुषः) |
| वंशहीनः | – | वंशेन हीनः, (तृतीया तत्पुरुषः) |
| कुशहस्तः | – | कुशः हस्ते यस्य सः, (बहुव्रीहिः) |
| विश्वासभूमिः | – | विश्वासस्य भूमिः, (षष्ठी तत्पुरुषः) |

## अभ्यासः
## ( मौखिकः )

1. **अधोलिखितानां प्रश्नानाम् उत्तरं वदत –**

   (क) कः स्नातः कुशहस्तः सरस्तीरे ब्रूते ?

   (ख) 'भाग्येनैतत्संभवति'- इति केन आलोचितम् ?

   (ग) वृद्धव्याघ्रः किं दातुम् इच्छति स्म ?

   (घ) पथिकः कुत्र निमग्नः अभवत् ?

   (ङ) पथिकः केन व्यापादितः खादितश्च ?

2. **उदाहरणमनुसृत्य उत्तरं वदत–**

उदाहरणमनुसृत्य – स्ना + क्त्वा – स्नात्वा

(क) ........................................................ पठित्वा।

(ख) ........................................................ खादित्वा।

(ग) ........................................................ गत्वा।

(घ) ........................................................ दृष्ट्वा।

(ङ) ........................................................ हसित्वा।

3. **उदाहरणमनुसृत्य पञ्च पदानि वदत –**

उदाहरणम् – दा + तव्यत् – दातव्यम्

(क) श्रु ................................।

(ख) गम् ................................।

(ग) स्मृ ................................।

(घ) कृ ................................।

(ङ) हस् ................................।

4. **उदाहरणमनुसृत्य अधोलिखितेषु पदेषु प्रकृतिं प्रत्ययं च वदत – मृ + क्तः – मृतः**

(क) गतः ................................।

(ख) उक्तः ................................।

(ग) कृतः ................................।

(घ) पठितः ................................।

(ङ) चलितः ................................।

## अभ्यासः
### ( लिखितः )

1. **अधोलिखितानाम् प्रश्नानाम् एकपदेन उत्तरं लिखत -**

(क) वृद्धव्याघ्रः कुत्र ब्रूते ?

(ख) कः लोभाकृष्टः अभवत् ?

(ग) कः सुवर्णकङ्कणं दातुम् इच्छति स्म ?

(घ) कः स्नानशीलः दाता गलितनखदन्तः च आसीत् ?

(ङ) कः वंशहीन आसीत् ?

(च) कः पङ्के अपतत् ?

2. **अधोलिखितानां प्रश्नानां पूर्णवाक्येन उत्तरं लिखत ?**

(क) 'कुत्र तव कङ्कणम्' इति कः अवदत् ?

(ख) व्याघ्रः कीदृशः आसीत् ?

(ग) व्याघ्रेण कानि अधीतानि ?

(घ) कस्य पुत्रा दाराश्च मृताः ?

(ङ) कः महापङ्के निमग्नः पलायितुमक्षमः ?

3. **सन्धिविच्छेदं कुरुत -**

सरस्तीरे, भाग्येनैतत्संभवति, पान्थोऽवदत् वधान्मे, वंशहीनश्चाहम्, धर्मशास्त्राण्यधीतानि, केनचिद्धार्मिकेणाहमादिष्टः, अतस्त्वामहमुत्थापयामि।

4. **अधोलिखितानां पदानां प्रकृति-प्रत्ययविभागं लिखत -**

स्नात्वा, स्नातुम्, प्रसार्य, उपगम्य, उक्त्वा, धृतः ।

5. **अधोलिखितानां क्रियापदानां स्ववाक्येषु प्रयोगं कुरुत -**

आलोचितम्, गृह्यताम्, दर्शयति, पतति, अचिन्तयत्, अवदत् ।

6. **रिक्तस्थानानि पूरयत -**

(क) भो भोः पान्थाः ! इदं .................. गृह्यताम्।

(ख) व्याघ्रः .................. प्रसार्य दर्शयति।

(ग) तदुपदेशादिदानीमहं कथं न .................. ?

(घ) वृद्धव्याघ्रेण संप्राप्तः सः .................. मृतः।

(ङ) अहह, ...................... पतितोऽसि।

7. **अधोलिखितेषु वाक्येषु रेखाङ्कितपदानि आधारीकृत्य प्रश्ननिर्माणं कुरुत -**

(क) व्याघ्रः हस्तं प्रसार्य दर्शयति।

(ख) पङ्के पतितं दृष्ट्वा व्याघ्रोऽवदत्।

(ग) व्याघ्रेण धृतः स पान्थोऽचिन्तयत्।

(घ) ईश्वरे धनं मा प्रयच्छ।

(ङ) ज्ञानं क्रियां विना भारः।

8. **रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं लिखत -**

(क) तदत्र सरसि स्नात्वा सुवर्णकङ्कणं गृहाण।

(ख) असौ व्याघ्रेण व्यापादितः खादितश्च।

(ग) कथं मारात्मके त्वयि विश्वासः।

(घ) तत् उपदेशात् इदानीमहं कथं न विश्वासभूमिः।

(ङ) अवशेन्द्रियचित्तानां क्रिया हस्तिस्नानमिव भवति।

## योग्यताविस्तारः

एष पाठः लोभस्य दुष्परिणामं प्रदर्शयति तथा शिक्षयति यत् लोभः पापस्य कारणम् अस्ति। हितोपदेशे पञ्चतन्त्रे च एतादृश्यः अनेकाः कथाः सन्ति, यत्र पशु-पक्षि-मनुष्याणां लोभविषयाः रोचकतया निरूपिताः सन्ति। तासां कथानां श्रवणेन आनन्दानुभूतिस्तु भवत्येव, व्यावहारिकं ज्ञानमपि वर्धते।

## क्रियानुशीलनम्

(1) हितोपदेशस्य पञ्चतन्त्रस्य च कथानां संग्रहं कृत्वा तत्र निरूपितस्य लोभस्य दुष्परिणामस्य पृष्ठभूमिः रेखाङ्कनीया।

(2) सिंहस्य चरित्रम् अद्यापि अस्माकं समाजे तथैव विराजते। शोषकाणां वञ्चकानां च चरित्रं सिंहस्य चरित्रेण सह तोलनीयम् अस्ति।

□